National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 204-206
© 2025 NJHSR
www.sanskritarticle.com

**डा. भारतभूषणरथः**
सहाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः – आ.प्र

**Correspondence:**
**डा. भारतभूषणरथः**
सहाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः – आ.प्र

# संस्कृतानुवादपरम्परायाम् ओडिआसाहित्यम्

**डा. भारतभूषणरथः**

**उपत्रमः-**

विस्तृतं संस्कृतवाङ्मयम्। भिन्नभिन्न शास्त्रेषु समृद्धा एषा भाषा। संस्कृतभाषा देवैः व्यवहृता, ऋषिभिः उपासिता, साधुभिः सेविता, विद्वद्भिः संरक्षिता च वर्तते। अनया भाषया सह भारते व्यवहृतानां भाषाणां अङ्गाङ्गीसम्पर्कः। भाषापरिवारे मातृरूपिणी अस्ति संस्कृतभाषा। अतः प्राचीन कालाद् संस्कृतभाषायां विरचितानां शास्त्राणाम् अनुवादे अनुवादकाः दत्तचित्ताः। ये पाठकाः संस्कृतभाषां न जानन्ति ते अनुवादमाध्यमेन शास्त्रोक्तं तत्त्वं ज्ञात्वा ज्ञानार्जनं कुर्वन्ति। वेद – वेदान्त तथा पुराणानि प्राचीनकालादेव अनुदितानि वर्तन्ते। इमां धारामनुसृत्य संस्कृते उपनिवद्धानां काव्य-महाकाव्यादीनां च अनुवादः विविधभाषासु वहु वर्षेभ्यः जायमानमस्ति। अनेन क्रमेण संस्कृतेतरभाषासु विरचितानां कथा-कविता-उपन्यासादीनां च संस्कृते भाषानुवादः अपरेकः सुखदो विषयः। संस्कृतं विश्वभाषायाः मान्यतां प्राप्नोति। अतः संस्कृते अनूदितं ग्रन्थं विश्वे प्रचारितं भवति। अतः विविधाञ्चलिकभाषया ये ग्रन्थाः विरचिताः तेषां ग्रन्थानां संस्कृतानुवादं कृत्वा पाठकानां रुचिमभिवर्द्धयितुम् अनुवादकानां श्लाघनीयो प्रयाशः। अनया परम्परया एकविंशशतकस्य संस्कृतानुवादेषु ओडिआग्रन्थानां महत्वपूर्णं स्थानं वरीवर्त्ती।

**ओडिआभाषापरिचयः -**

ओडिआभाषा भारतस्य पूर्वाञ्चले स्थिते ओडिशाप्रदेशे व्यवहृता भाषा। ओडिशाराज्यस्य पूर्वनाम उत्कल इति प्रसिद्धिः। उत्कृष्टा कला अस्मिन् राज्ये अस्तीतिहेतोः अस्य नाम उत्कल इति प्राचीनप्रयोगः। सम्राट् अशोकः यदा अमुं प्रदेशं शासति स्म तदानी अस्य प्रदेशस्य नाम कलिङ्ग इत्यपि प्रसिद्धः । राज्यस्यास्य चतुःष्कोटिसंख्यकाः जनाः स्वमातृभाषया ओडिआभाषया कथोपकथनं कुर्वन्ति। ओडिशाप्रदेशस्य संस्कृतिः यथा बलिष्ठा अस्याः भाषा अपि तथा मधुरा । विशेषतया भारतवर्षस्य धामचतुष्टयेषु पुरीश्रीजगन्नाथधाम्नः वैशेष्ट्यं भिन्नम्। श्रीजगन्नाथस्य दारुविग्रहं द्रष्टुं भक्तानां महान् आग्रहः। अयं प्रसिद्धो जगन्नाथधाम ओडिशाप्रदेशे पुरुषोत्तमक्षेत्रे पुर्याम् एव वर्तते। श्रीजगन्नाथस्य प्रदेश इति हेतोः अत्र भक्तिसाहित्यस्य अनन्या परम्परा प्रवाहिता अस्ति। ओडिआ-भक्तिसाहित्यस्य संस्कृतानुवादः पाठकानां रुचिं सर्वथा वर्द्धयति एव। अनेके वरिष्ठाः साहित्यसाधकाः ओडिआभाषायां समृद्धं साहित्यं विरचितवन्तः। तत्रापि विशेषतया ओडिआ-भक्तिसाहित्ये जगन्नाथदासः, सारलादासः, तथा अच्युतानन्ददासप्रभृतयः प्रातःस्मरणीयाः। कविसूर्यः बलदेवरथः, फकिरमोहनसेनापतिः, कविवरः राधानाथरायः, कविसम्राटउपेन्द्रभञ्जः, स्वभावकविः गङ्गाधरमेहेरः, सचिदानन्दराउतरायः, कुन्तलाकुमारीसावतः, मधुसूदनरावः, गोपालचन्द्रप्रहराजः, गोपबन्धुदाशेत्यादयः प्राक्तनाः ओडिआ-साहित्यिकाः ओडिआसाहित्यस्य समृद्धये वहु प्रयत्नं कृतवन्तः। तदनन्तरकाले पद्मश्री मनोजदासः, रमाकान्तरथः, प्रतिभारायः, बिभूतिपट्टनायकः तथा गौरहरिदासप्रभृतयः साहित्यसाधकाः ओडिआभाषासाहित्यस्य धाराम् इतोपि विकशितवन्तः। विशेषतया आधुनिकसाहित्यदृष्ट्या ओडिआसाहित्यस्य कलेवराभिवृद्धये अनेके सुप्रसिद्धसाहित्यसाधकाः युवसाधकाश्च प्रयत्नशीलाः दृश्यन्ते। विश्वसाहित्येन सह ओडिआसाहित्यस्य समानता यथा भवेत् तदर्थं साम्प्रतिकसमये ओडिआसाहित्यिकानां प्रयाशः सर्वथा अभिनन्दनीयो वर्तते। भषायाः अस्याः गुरुत्वं दृष्ट्वा भारतसंविधानेन शास्त्रीयभाषारूपेण अस्याः सम्मानं कृतमस्ति। अतः ओडिआसाहित्यस्य अध्ययनं कर्तुं

सर्वभारतीयस्तरे पाठकानां रुचिः दिनुदिनम् अभिवर्द्धते। एतत् मनसि निधाय अनुवादकैः विविध भाषासु ओडिआसाहित्यस्य अनुवादं कुर्वन्ति एव। यथा अन्य भाषासु तथा संस्कृतेऽनूदितसाहित्ये अपि ओडिआभाषया विरचितानां कथा-कविता-उपन्यासप्रभृतिनां अनुवादः वहुलतया परिलक्ष्यते। तत्रापि एकविंशशतके एषा अनुवादपरम्परा इतोपि अग्रगामिनी परिदृश्यते। ओडिआ-भक्तिसाहित्यं तथा काव्य-महाकाव्यानां च संस्कृतानुवादपरम्परया सह आधुनिकसाहित्यस्य अनुवादे अपि संस्कृतज्ञाः दत्तचित्ताः। ओडिआ – संस्कृतभाषयोः सम्पर्कः अत्यन्त समधर्मी। संस्कृतभाषायाः अनेके शब्दाः यथावत् ओडिआभाषया व्यवह्रीयन्ते। विशेषतया क्रियापदानां व्यवहारे उभयोः भाषयोः वहु साम्यं वर्तते। अतः ओडिआभाषायाः शास्त्रीयकाव्यकवितानां पठने संस्कृतं वेति अनुमीयते। भाषयोः सामञ्जस्यवशात् ओडिआभाषया विरचितानां शास्त्रीयसाहित्यानां संस्कृतानुवादः वहुपूर्वं प्रारब्धः। कालान्तरे समसामयिक-ओडिआसाहित्यस्य संस्कृतानुवादपरम्परा प्रारब्धा। अनुवादस्य नियमान् सम्यग् अवधारणं कृत्वा संस्कृतविद्वद्भिः कृतोनुवादः सर्वथा पाठकानां मनो हरति।

**अनुवादस्य स्वरूपम् –**

अनु पश्चाद् कथनमनुवादः। यत्र मूलरचनायाः अपरस्यां भाषायां लेखनं भवति स अनुवादः। अनुवादः सदैव परवर्ती भवति, मूलरचना भवति पूर्ववर्तिनी। अनुवादे मूलभाषा भवति स्रोतः अनूदिता भाषा तत्स्रोतसा उपकृता। संस्कृतेऽनूदितसाहित्यमिति डा.नारायणदाशेन लिखितं पुस्तकं अनुवादस्वरूपविषये विस्तृतं तथ्यं प्रकटयति। तन्मतानुसारं अनुवाद-विभाजनस्य आधारत्रयं वर्तते – माध्यमः, प्रकारः,पाठश्चेति। तथैव अर्थपक्षे अन्तर्गतानुवादस्य चत्वारः भेदाः सन्ति। यथा - 1. शाब्दिकः अनुवादः, 2. शब्दप्रतिशब्दः अनुवादः, 3. भावानुवादः 4. छायानुवादः। ग्रन्थस्यास्य प्रस्तावनायां राष्ट्रियसंस्कृतसंस्थानस्य मान्याः कुलपतिचराः अनुवादस्य सूत्रं लिखन्ति यद् –

**रूपान्तरमनुवादः।।** 1.2. [1]

**अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक।**

(कुमारसम्भवम् १-५१)

अत्रैव अनुवादस्य विस्तृतं स्वरूपं दर्शयित्वा आचार्याः टिप्पणिं दत्वा लिखन्ति यत् –

"वस्तुतः समस्तं वाङ्मयं परमात्मना यत् कृतं कथितं वा तस्य अनुकरणम् अनुवचनं छाया वा वर्तते। परमात्मना यत्किमपि कथितपूर्वं तस्यैव अनुकीर्तनं वयं कुर्मः, परमात्मना यत् विश्वं रचितं तस्य नानाविधकलाकृतिषु अनुकरणं वयं कुर्मः। अत एव मानवानां समस्तं कृतित्वमेव अनुवादः। प्रत्येकं परवर्तिनी साहित्यरचना ईश्वरनिर्मितस्यास्य जगतः पदार्थानां पूर्ववर्तिनीनां रचनानां वा छायाभिर्विनिर्मीयते, अत एव सर्वमेव साहित्यमनुवादरूपमेव"।[2]

अन्यदेकम् मतमुपस्थापयित्वा लिखन्ति यत् – "आधुनिकदृष्ट्या तु एकस्याः भाषाया उक्तस्य लिखितस्य वा पाठस्य अपरस्यां भाषायां स्थानान्तरणम् अनुवादः।" Translation is the replacement of a textual material in one language by equivalent textual material in another language.[3]

त्रिपाठिमहोदयस्य मतानुसारं यथा शिष्यः विशेषकरणेन गुरवे प्रत्युपदेशं विधत्ते, यथा वा नद्या विनिःसृता कुल्या विविधग्रामनगरक्षेत्राणि सिञ्चन्ती तदीयप्रवाहं लोकोपकाराय प्रसारयति, तथैव अनुवादो मूलकृतिमनुहरन्नपि तस्यां विशेषं कमपि संयोज्य तां प्रत्युपकरोति, तां लोके प्रसारयति, तन्माहात्म्यं च प्रगुणीकरोति। इत्थं च अन्तरा मूलरचना तदनुवादं च रूपप्रतिरूपसम्बन्धः, संवाद्यसंवादसम्बन्धः, बिम्बप्रतिबिम्बसम्बन्ध आभास्याभाससम्बन्धो वा स्यात्।[4]

अनेन ज्ञायते प्रत्येकमपि भाषायाम् अनुवादसाहित्यस्य स्थानं स्वतन्त्रम्। मूलरचनायाः यथातथा वर्णनम् अनुवादे भवेत् चेत् अनुवादकस्य यशः, नास्ति चेत् ग्रन्थकर्तुः प्रतिष्ठा गच्छति अनुवादकस्य च अपकीर्तिः। मूललेखकस्य भावनया सह अनुवादकस्य समभावना भवति चेद् एव तत् साहित्यम् उत्कृष्टं भवति। अतः कदाचित् नूतन काव्य – कविता - उपन्यासादीनां च लेखनं सौकरं परन्तु अनुवादकार्यं सर्वथा कष्टकरम् एव। तत्रापि आधुनिकसाहित्यस्य अनुवादः इतोपि कष्टसाध्यम् । पौराणिकविषयाणाम् अनुवादे अनुवादकः विषयं प्रति अधिकतया ध्यानं ददाति परन्तु आधुनिकसाहित्यस्य अनुवादे अनुवादको भावं प्रति विषयं प्रति च जागरुको भवति।

उपरोक्तानुवादस्वरूपाधारेण एकविंशशतके बहुनाम् ओडिआग्रन्थानां संस्कृतानुवादः जातः। तेषु अनुवादकार्येषु यत् किञ्चित् मम दृष्टिपथि आगतं तदत्र प्रस्तूयते ।

**वैदेहीशविलासकाव्यस्य संस्कृतानुवादः –**

संस्कृते बहूनां प्रसिद्ध-ओडिआकाव्यानां संस्कृतानुवादः जातः। तत्रापि विशेषतया विंशशतकस्य संस्कृतविद्वत्सु पण्डितभागवत-प्रसाददाशशर्मणः अनूदितं काव्यं 'वैदेहीशविलासम्' आधुनिककाव्या-नुवादपरम्परायाः प्रमुखस्रोतः। अस्यानूदितकाव्यस्यास्य उदाहरणानि यथा –

**मङ्गलपद्यम् –**

**विभ्राजितोदीप्तकरौजसाञ्जसा विभावरीसञ्चरमोदसंहरः।**
**व्यावन्दितो मे सुमनो विपूजितो विभुस्तमश्चक्रविनाशको हरिः।।**[5]

यमकपर्णानुवादश्लोकाः यथा –

**विनायकमहं वन्दे विनायकसुपूजितम्।**
**विनायकप्रियं नित्यं विनायक इहैव मे।।**
**वारणाननमानौमि वारणाय दुरापदः।**
**वैदेहीशविलासानुवादे वै देहि शेमुषीम्।।**

अनूदितेऽस्मिन् काव्ये पूर्णयमकः यथा –

**वनप्रियप्रमुद्दात्री लोकेष्वेषा मनोरमा।**
**वनप्रियप्रमुद्दात्री लोकेष्वेषा मनोरमा।।**
**विराजिकनकाचन्द्रकदम्बरुचिरा सदा।**
**विराजिकनकाचन्द्रकदम्बरुचिरा सदा।।**
**वासमात्रसमाच्छन्ना दीप्ततुङ्गपयोधरा।**
**वासमात्रसमाच्छन्ना दीप्ततुङ्गपयोधरा।**[6]

एवमेव अनन्तत्रिपाठिशर्मणः 'लावण्यवती'ति प्रेमकाव्यम् अत्यन्तम् उत्कृष्टं वर्तते।प्रथितयशसः अस्य अनूदितकृतिं द्विधा विभाजयितुं शक्यते। प्रथमपर्याये वर्तते सेक्सपियरस्य चत्वारि नाटकानि। द्वितीयतः कविसम्राजः उपेन्द्रभञ्जस्य अपूर्वम् अष्टचत्वारिंशत्सर्गात्मकं प्रेमकाव्यं लावण्यवती इति। षोडशशतकसमुद्भवस्य उपेन्द्रभञ्जस्य गीतं उत्कले आबालवृद्धवनिताः गायन्ति। अतः विशिष्ट समाजसेवकः गोपबन्धिदाशः अवदत् –

**गाए तुम्भ गीत सभारे पण्डित पथे पान्थ हृष्टमना।**
**विले गाए चषा अन्तःपुरे योषा नृत्यरङ्गे वाराङ्गना।।**
(ओडिआमूलम्)

अस्य संस्कृतानुवादं कृत्वा लिखति अनन्तत्रिपाठिशर्मा –

**गायति ते गीतं सभायां पण्डितः पथि पान्थो हृष्टमनाः।**
**क्षेत्रे तु कृषिकः अन्तःपुरे योषा नृत्यरङ्गे वाराङ्गना।।**

एवमेव यमालङ्कारपूर्णः अनुवादः यथा –

**देखरे नलिनि नलिनि नलिनी रे पूरित।**
**भ्रमन्ति भ्रम रे भ्रमरे भ्रमररे शोभित।।** (ओडिआमूलम्)

**संस्कृतानुवादः –**

भ्रमवति ! भ्रमरा भ्रमराजिताः सनलिनी नलिनीह विराजते।

**सरशने रचनासु सुखोचितं सकमलं कमलायतलोचने।**
**घनरशं घननीलशिरोरुहे कलय जीवनदं खलु जीवनम्।।** इति[7]

एतौ द्वावपि ओडिशाराज्यस्य प्रसिद्धौ विद्वांसौ आस्ताम्। द्वावपि आधुनिकानुवादसाहित्यस्य पथप्रदर्शकौ इति वक्तुं शक्यते।

**पण्डितकालीप्रसन्नशतपथी –**

पण्डितकालीप्रसन्नशतपथी ओडिशाराज्यस्य सुनामधन्यः संस्कृत-विद्वान् अस्ति। अस्य अनुवादग्रन्थद्वयं वर्तते। यथा – 'कालिजाई' तथा 'श्रीशिवानन्दगीता'। एतेन सह विविधग्रन्थानां लघ्वी कविता अपि अनुवादं कृतवान् अयं विद्वान्। पण्डितगोदावरीशमिश्रप्रणीतस्य 'कालिजाई' इति प्रसिद्धकवितायाः अनुवादे एतेषां प्रसिद्धिः।

ग्रन्थस्यास्य विषयः एवं वर्तते - नवविवाहिता वधू 'कालिजाई' स्वपित्रा सह यदा पतिगृहं गच्छति तस्याः मनसि अपारानन्दः। कन्यां त्यक्तुं पिता तया सह पतिगृहं गच्छति। स्वग्राम वालुग्रामतः चिलिका इति ह्रदस्य अपारजलराशिं नौकासाहायेन पारं कृत्वा, पतिगृहं पारिकुदद्वीपं प्रति गन्तव्यमस्ति। गमनमार्गे भीषणवायुप्रवाहहेतोः नौका जले निमज्जति। कालिजाई तत्रैव जलराशौ शरीरं त्यजति। तदारभ्य सा समीपस्थे लघुपर्वते प्रत्यक्ष देवीरूपेण पूजिता भवति। चिलिकाह्रदे ये गच्छन्ति तान् जलभयात् रक्षति देवी 'कालिजाई'। अस्य पद्यस्य अश्रुलं वर्णनं पाठकानां हृदयं स्पृशति। यथोदाहरणम् –

भलकरि नाआ वाहारे नाउरि, झिअकु माडुछि डर।
गडे गडलोक चाहिँ वसिछन्ति, झिअ जाए शाशुघर।। (ओडिआमूलम्)

संस्कृतानुवादः –

**सुभावेन नावं वाहय नाविक ! बाला समाप्नोति भयम्।**
**दुर्गे दुर्गजनाः प्रतीक्षानिरताः बाला याति श्वश्रालयम्।।** [8]

अत्र गेयस्वरेण वङ्गलाश्रीछन्दसा अनुवादः परिलक्षते।

एवमेव स्वामिशिवानन्दसरस्वतीप्रणीताङ्ग्लशिवानन्दगीतायाः संस्कृतानुवादः अनेन कृतो वर्तते। अनुवादस्यास्य गङ्गामाहात्म्य-मुदाहरणं यथा –

**मद्दिव्यजननीगङ्गा दिव्यः पिता हिमालयः।**
**सम्यक् प्रेरयतो मह्यं तावपि मार्गदर्शकौ।।**
**स्नानं करोमि गङ्गायां गङ्गापूजां करोम्यहम्।**
**भोजयामि झषान् चैव गङ्गाजलनिवासिनः।।**[9]

एतेषां अनुवादकानां पदाङ्कानुसरणं कृत्वा अनेके उत्कलीयविद्वांसः कालान्तरे अनुवादं कृतवन्तः। तत्रापि विशेषतया पण्डितकालीप्रसन्नशतपथी, पण्डितनारायणरथः, पण्डितप्रबोधचन्द्र-मिश्रः, आचार्यहरेकृष्णशतपथी,आचार्यगोपबन्धुमिश्रः,आचार्यनमालि-विश्वालः, पण्डितगदाधरदाशः, डाँ. क्षीरोदचन्द्रदाशः, डाँ.हरेकृष्ण-मेहेरः, पण्डितश्रीनिवासउद्गाता, डाँ.नारायणदाशः, पण्डित उमाकान्तपण्डा, डँ. कृष्णकेशव षडङ्गी, डाँ.सोमनाथदाशः, डाँ. भारत भूषण रथप्रभृतीनां च संस्कृतानुवादे विशिष्टं स्थानं वर्तते।

**संकेताक्षरसूची -**

1.संस्कृतेऽनूदितसाहित्यम् – डा. नारायणदाशः, प्रकाशकः – वनारस मर्केन्टाइल कोम्पानी, कोलकता – 6, 2019
2.वैदेहीशविलासः-(संस्कृतानुवादः) -पण्डितभागवतप्रसाददाशशर्मा
3.कालिजाई - पण्डितकालीप्रसन्नशतपथी
4.Tradition and Individual Talent, T.S.Eliot, 1915

**संदर्भ ग्रंथा: -**

1 संस्कृतेऽनूदितसाहित्यम् – पृ.सं – 3)
2 Tradition and Individual Talent, T.S.Eliot, 1915, p.14-15)
3 Catford,J.C,1965, A Lingustic Theory of Translation)
4 संस्कृतेऽनूदितसाहित्यम् – पृ.सं – 4
5 वैदेहीशविलास – संस्कृतानुवादः - 1.1
6 वैदेहीशविलास – संस्कृतानुवादः – 7.34-36
7 संस्कृतेऽनूदितसाहित्यम् – पृ.सं – 125
8 कालिजाई
9 श्रीशिवानन्दगीता – 48-50